# सामिधेनी मन्त्र व्याख्यान विवरणम्

**DSV Jagannatha Sharma**
**Assistant Professor**
**Kalpa Department, S.V. Vedic University,Tirupati**

**दे॒वा वै नर्चिं न यजु॑ष्यश्रयन्त॒ ते साम॑न्नेवाश्रयन्त हिं करोति सामैवाकु॒र्हिं करोति**

अतः [1]परमग्निहोत्रस्य ब्राह्मणं प्राजात्यमेव काण्डम् ॥देवा वा इत्यादि ॥

ऋचि यजुषि च न अश्रयन्त नासेवन्त इति च स्तुतिः।

यजनं च नानीयन्त [2]"सामन् एव अश्रयन्त"।साम सान्त्वने।

तस्मात् हिं करोति हिंकारं प्रयुङ्क्ते सामिधेनीनामनुवचनारम्भे

**अनुवाकैः षड्भिरेतैराध्वर्यवमुदीरितम् ॥**

अथोत्तरैरनुवाकैर्होत्र विवक्षुरस्मिन् सप्तमेनुवाके [3]तदनन्तरभाविन्यष्टमे च सामिधेनीमन्त्रा व्याख्यायन्ते। ते च ब्राह्मणग्रन्थे तृतीयकाण्डे पञ्चमप्रपाठके समाम्नाताः।

कल्पः(ल्पे) "पुरस्तात् सामिधेनीनाँ होता" इत्युपक्रम्य "अन्तराहवनीयमुत्करं च प्रतीचीनं गच्छञ्जपति कं प्रपद्ये तं प्रपद्ये" इत्यादिकमुक्त्वा "सत्यं प्रपद्य इति वा"(आपश्री २४.११.१-२) इति पक्षान्तरमुक्तम्॥

तत्पाठस्तु–"सत्यं प्रपद्ये। ऋतं प्रपद्ये। अमृतं प्रपद्ये।

प्रजापतेः प्रियां तनुवमनातो प्रपद्ये। इदमहं पञ्चदशेन वज्रेण। द्विषन्तं भ्रातृव्यमव क्रामामि।

योस्मान् द्वेष्टि। यं च वयं द्विष्मः। भूर्भुवः सुवः। हिम्" (तैब्रा ३.५.१) इति।

सत्यं यथार्थभूतमिदं कर्म प्रपद्ये प्रारभे। अस्मिन् कर्मणि वाचिकोपराधो मा भूदित्यर्थः।

मनसा [4]चिन्त्यमानमप्यृतं यथा भवति तथा प्रपद्ये। मानसोप्यपराधो मा भूदित्यर्थः।

अमृतत्व हेतुभूतमिदं कर्म प्रपद्ये। अनेन कर्मणा देवत्वं प्राप्यतामित्यर्थः।

देवेष्वप्यार्तिरहितां प्रजापतेः प्रियां तनुवं [5]प्रजापति - शरीरसदृशमिदं कर्म प्रपद्ये।

इदमिति हस्तेनाभिनयः।

अहं होता पञ्चदशस्तोमसदृशेन वज्ररूपेणानेन कर्मणा द्विषन्तं शत्रुमवष्टभ्य पीडयामि।

यः शत्रुरस्मान् मनसा द्वेष्टि यं च शत्रुं वयं मनसा द्विष्मस्तमुभय- विधमवक्रामामीति पूर्वत्रान्वयः।

भूर्भुवः सुवरित्येतन्नामका [6]लोकास्तान् हिनोमि प्रीणयामीत्यर्थः[7]॥

कल्प- "व्याहृतीरुक्त्वा त्रिरभिहिंकृत्यानवानमभिहिंकाराद्दचमुपसंदधाति प्र वो वाजा अभिद्यव इत्येका- दशेमाः सामिधेन्यः" (द्र.बौश्री३.२७)इति ॥

अनवानमनुच्छ्वसन् ॥ तत्र प्रथमायाः पाठस्तु - "प्र वो वाजा अभिद्यवः।

हविष्मन्तो घृताच्या। देवाञ्जिगाति सुम्नयुः" (तैब्रा३.५.२) इति।

हे देवाः, वो युष्मदीया ऋत्विग्यजमानाः प्रवर्तन्ते।

वाजा गमनशीला मासा अभिद्यवोभितः पूर्वपक्षरूपेणोत्तरपक्षरूपेण च दीप्यमाना अर्धमासा हविष्मन्तो हविर्भाजो देवाश्च घृताच्या यागसाधनभूतघृतप्रदया गवा सहानुकूलाः प्रवर्तन्तामित्यध्याहारः।

[8]"किं चार्य" यज्ञो देवाञ्जगाति प्राप्नोतु। यजमानस्य सुम्नयुः सुखेच्छुर्भवतु ॥

**देवा इति॥**

[9]"यदुक्तं 'त्रिरभिहिंकृत्य'" इति तदेतद्विधत्ते - 'देवा वै नर्चि न यजुष्य श्रयन्त ते सामन्नेवाश्रयन्त हिं करोति सामैवाकहिं करोति यत्रैव देवा अश्रयन्त तत एवैनान् प्र युङ्क्ते हिं करोति वाच एवैष योगो हिं करोति प्रजा एव तद्यजमानः सृजते' इति ॥

देवाः पूर्वम् ऋचि न [10]"अश्रयन्त यजुषि अपि न "अश्रयन्त न संतुष्टा इत्यर्थः।

किंतु [11]सामनि एव संतुष्टाः। ततः हिम् इति शब्दमुच्चारयेत्।

**यत्रैव दे॒वा अश्र॒यन्त॒ तत॑ ए॒वैनान् प्र यु॒ङ्क्ते हिं करोति वा॒च ए॒वैष योगो हिं क॑रोति**
**प्र॒जा ए॒व तद्यज॑मानः सृजते॒ त्रिः प्र॑थ॒मामन्वा॑ह॒ त्रिरु॑त्त॒मां य॒ज्ञस्यैव तद्धर्स (१)**
**नह्यत्यप्रस्त्रँ साय॒**

होता। हिनोति प्रीणयति वा सर्वमिति हिम्।

हि गतौ, हिवि प्रीणने, ब्रह्मणो नामेदं, छान्दसी [12]रूपसिद्धिः।

साम एव 'अकः कृतं भवति, सामभक्तित्वाद्धिकारस्य।

---

[1] पं२० मै ४ . परमिष्टिहौत्रस्य।
[2] तं३ ० लं . समन्तो वा श्रयतेए मै. सामन्येवाश्रयन्त।
[3] आ० क . भाव्यष्टमे।
[4] ड . चिन्त्यमप्यतं।
[5] आ० क० ड . शरीरमिदं।
[6] क० ड०हो १. ये लोकास्तान्।
[7] ड . ३ इत्यर्थः ३ नास्ति।
[8] ड०श्रृं० हो१ . ३ किं च ३ नास्ति।
[9] आ . यदेतदुक्तं त्रिर्हिंकरोतिय ड . यदुक्तं त्रिभिरभिहिंकृत्य द्य यदुक्तं त्रिभिरभिहिंकृत्य।
[10] ड० श्रृं० हो१ . आश्रिताः।
[11] ड० हो १ . साम्नैव।
[12] तं३ लं. रूपविधिः।

छान्दसो लुङ, “मन्त्रे घस ं ” (पा २·४.८०) इति च्लेर्लुक्।
असकृद्विधानं हिंकारस्य फलमेद प्रदर्शनार्थम्। यत्रैवेति।
यत्र स्थिताः देवाः ततः एव एनान् देवानानीय इह प्रयुङ्क्ते॥

**वाच इति॥**

वाग्योगः खल्वयम्। [1]वाक् सामिधेनीलक्षणा अनेन युज्यते।
प्रजा एवेति। *एतेन हिंकारस्य पशव्यत्वमाह ॥
त्रिः प्रथमामित्यादि॥“प्र वो वाजाः” ( तैत्रा ३.५.२ ) इत्याद्या एकादशचः।
आद्यन्तयोः पुनर्वचनेन पञ्चदश सामिधेन्यः क्रियन्ते।
तेन सामिधेनीनाम् आद्यन्तयोः अभ्यासेन यज्ञस्य बर्सम् आवरणं नह्यति बध्नाति।
व आवरणे, औणादिकः सप्रत्ययः तत् यज्ञस्य अप्रसंसनाय भवति *।
तेन साम एव कृतं भवति। [2]“पञ्चकृत्वः सप्तकृत्वो” वा साम्न आदौ [3]हिंकारस्य विद्यमानत्वात्।
तस्य हिमितिशब्दस्य त्रिरुच्चारणमभिप्रेत्य त्रिवारं विधिरनूद्य प्रशस्यते।
यत्र एव देवा: अश्रयन्त यत्रैव सामनि देवा संतुष्टाः ततः एव साम्नः एनान् देवान् प्रयुङ्क्ते [4]होता हिंकुर्वन् प्रकर्षेण तोषयतीत्यर्थः।
प्रथमोच्चारणेन साम कृतं भवति।
तथा द्वितीयोच्चारणेन वाचः सामाश्रयभूताया ऋयूपाया वाचः संबन्धः संपद्यत इत्यर्थः।
तृतीयोच्चारणं यदस्ति तेन यजमानः प्रजाः एव सृष्टवान् भवति ॥
योगः संपद्यते।

**त्रिरिति ॥**

एकादशानां समिधेनीनाम् ऋचामाद्यन्तयोरावृत्तिं विधत्ते-'त्रिः प्रथमामन्वाह त्रिरुत्तमां यज्ञस्यैव तद्बर्स नात्यप्रत्र साय' इति॥
"प्र वो वाजा अभिद्यवः" ( तैब्रा ३.५.२ ) इत्येषा प्रथमा।
“आ जुहोत दुवस्यत" (तैत्रा ३.५.२ ) इति वा, " त्वं वरुण उत मित्रः "( तैब्रा ३.५.२ )

**संतंतुमन्वांह प्राुणानांमुन्नाद्यंस्यु संतंत्याु अथोु रक्षंसाुमपंहत्यैु राधंतरीं प्रथुमामन्वां हु**
**राङ्गेतरोु वा अुयं लोुक इुममेुव लोुकमुभि जंयतिु त्रिर्व गृह्णातिु त्रयं इुमे लोुका**

**संततमिति ॥**

पूर्वस्था उत्तरमधर्चम् उत्तरस्याश्च पूर्वं संहितं कुर्यात्।
[5]प्रथमायां च हिंकारेण [6]मध्यमाया अर्धर्चमालभेत।
न हिंकृत्येति केचित्। अविशेषात् सर्वेषां संततत्वम्।
ऋचावन्तरानुच्छ्वासः संततत्वम्। श्रूयते - "नान्तरच व्यन्यात्" (द्र. आप श्रौ २४.११.१२-१३ ) इति।
एकेनोच्छ्वासेनोच्चार्यैव क्रियमाणं प्राणानाम् अन्नाद्यस्य च अविच्छेदाय भवति।
अथो अपि च रक्षसाम् अपहत्यै भवति, सामिधेनीनाम् अनुच्छ्वासेन रक्षसामनुच्छ्वासः क्रियते इति।
केचिदाहुः - प्रथमोत्तमयोरेवेदं संतत्वविधान मिति ॥

**राथन्तरीमिति ॥**

सामविशेषसंबन्धेन ऋचः स्तुतिः।
रथन्तरसामसंबन्धिनी प्रथमा ऋक्, प्राथम्यात् द्वयोरुदात्तखरत्वाच्च।
[7]उत्सादिवादञ् ( पा ४.१.८६ )। अयं लोकः भूलोकः राथन्तरः, स एव हेतुः॥
इति वा द्वयोरन्यतरोत्तमा।
तत् तेन प्रथमोत्तमयोः त्रिः अभ्यासेन यज्ञस्य बर्सम् [8]अन्तभागं नह्यति बध्नाति।
यथा लोके वस्त्रेण कम्बलेन वा व्रीहीन् वोढुकामोन्तद्वयं बध्नाति तद्वत्।
तच्च बन्धनं सनराहित्याय भवति ॥

**संततमिति ॥**

पूर्वस्यामृच्युत्तरार्धस्योत्तरस्यामृचि पूर्वार्धस्य च [9]परस्परमविश्लेषं विधत्ते- ‘संततमन्वाह प्राणानामन्नाद्यस्य संतत्या अथो रक्षसामपहत्यै' इति।
तदेतत्संततोच्चारणं यजमानस्य [10]प्राणानां संतत्यै [11]भोज्यवस्तुसंतत्यै [12]च संपद्यते।

---

[1] ण पं२ . याय तं३ ण लं . वा। '.' ख३णलं. श्एतेन हिङ्कारस्य णणण भवतिश नास्ति। , द्य
[2] डण हो १ . पञ्चभक्तैः सप्तभक्तैः।
[3] अण इण उण जोण नाण पाण हा . हिंकारस्य श नास्ति।
[4] हो १ . होत्रा।
[5] मै४ . प्रथमायाः।
[6] मै४ . मध्यमायाम् य तं३ ण लं . मध्यमया।
[7] हो . श अञ्श नास्ति।
[8] आ . अन्तभागान्।
[9] आण क. परस्पराविश्लेषं।
[10] ड. प्राण।
[11] कणडण हो १ . भोग्यवस्तु।
[12] शृं . भवति।

किं च राक्षसाः श्वासनिरोधेनापहता भवन्ति॥

**राथन्तरमिति ॥**

यस्याः प्रथमाया आवृत्तिर्विहिता तां स्वरूपेण विधत्ते- 'राथंतरीं प्रथमा- मन्वाह राथंतरो वा अयं लोक इममेव लोकमभि जयति' इति ॥
कस्मिंश्चित् सामशाखाविशेषे "प्र वो वाजाः" इत्येतस्यामृचि रथंतरसाम्नो गीतत्वादियं राथंतरी।
[1]"रथंतरसामयुक्तेन कर्मणा" संपादयितुं शक्यत्वाद्भूलोकस्य राथंतरत्वम् ॥

**त्रिरिति ॥**

यदुक्तं सूत्रकारेण - "तृतीयां सामिधेनीं त्रिर्विगृह्णाति" ( आपश्री २४.११.९ )
इति, तदेतद्विधत्ते - 'त्रिर्वि गृह्णाति त्रयं इमे लोका इमानेव लोकानभि जयति' इति ॥
तृतीयस्याः

**इमानेव लोकानभि जयति वार्हतीमुत्तमामन्वाह वार्हतो वा असौ लोकोमुमेव लोकमभि जयति प्र वा (२) वाजा इत्यनिरुक्तां प्राजापत्यामन्वाह यज्ञो वै प्रजापतिर्यज्ञमेव प्रजापतिमा रेभते**

अस्यास्त्रिविच्छेदो विग्रहः। तृतीयां त्रिः विगृह्णाति इत्येके। बार्हतीमिति ॥
"तं ला समिद्भिः" (तैब्रा ३.५.२) इति तृतीया तिसृणामुत्तमा। बृहच्छन्दोप्युत्सादिः।
बृहत्सामवत्त्वं पूर्ववत् संबन्धि, उभयोस्तृतीयत्वात्।

**अनिरुक्तामिति ||**

अस्पष्टदेवताकाम् अतः प्राजापत्यां, नीचैः स्वरत्वाच्च बृहच्छन्दसंबन्धित्वाच्च।
यज्ञात्मानं प्रजापतिम् आदौ परिगृह्णाति।
विशिष्टदेवतासंबन्धेन स्तुतिरेषा। अन्नं वै वाज इति। [2]वाजपदसंबन्धेन स्तुतिः।
सामिधेन्याः प्रथमपादमुच्चार्य सकृद्विग्रहः कार्यः। अर्धर्चे द्वितीयो विग्रहः।
तत [3]उत्तरार्ध [4]उपरितनमन्त्रस्य पूर्वार्धं च संयोज्य तदन्ते तृतीयो विग्रहः।
एतेन विग्रहत्रयेण लोकत्रयजयो भवति||

**बार्हतीमिति ॥**

यस्यामृच्ययं त्रिविधो विग्रहस्तामृचं विधत्ते - बार्हतीमुत्तमामन्वाह बार्हतो वा असौ लोकोमुमेव लोकमभि जयति' इति ॥
[5]अस्यामृचि 'बृहच्छोचा यविष्ट्य' ( तैब्रा ३.५.२ ) इति शब्दस्य श्रूयमाणत्वादियं बार्हती।
सा च तृतीयेति कृत्वा प्रथममध्यमापेक्षयोत्तमा।
तथा सति 'उत्तमाम् अन्वाह' इत्युक्ते तृतीयात्वेन पठेदित्यर्थो भवति।
एतन्मन्त्रोपेतकर्मसाध्यत्वात् स्वर्गलोकस्य बार्हतत्वम् ॥

**प्रेति ॥**

प्रथमायामृचि देवतादिविशेषाभिव्यक्त्यभावं प्रशंसति - 'प्र वो वाजा इत्यनिरुक्तां प्राजापत्यामन्वाह यज्ञो वै प्रजापतिर्यज्ञमेव प्रजापतिमा रभते' इति॥
कस्यापि देवविशेषस्य निरुक्तं नामविशेषकथनं तत्र नास्ति सेयमनिरुक्ता।
प्रजापतिश्च सृष्टेः [6]प्राग्रूपविशेषाभावादनिरुक्तः।
अत इयं प्राजापत्या। यज्ञः च प्रजापतिसृष्टत्वात् तत्स्वरूपः।
तस्मात् प्राजापत्यमन्त्रस्य प्रथमपाठेन यज्ञरूपम् एव प्रजापतिं प्रारब्धवान् भवति ॥

**इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे पञ्चमप्रपाठके सप्तमोनुवाकः ॥ ७ ॥**

---

[1] शृं . रथन्तरसाम।
[2] तं३ ण लंण हो . वाजिनपद।
[3] इणकणडणनाण हो१ . उत्तरार्धम्।।
[4] ण ड . उपरितनस्य मन्त्रस्य।
[5] आण उण जो. यस्यामृचिय अणइणकणडणपाणहाण हो १ . तस्यामृचि।
[6] ड . प्राग्रूपावशिष्टाभा य हो १ . प्राग्रूपविशिष्टाभा°□